# 2019

## SANSKRIT — GENERAL

**Paper : GE/CC-1**

**(Sanskrit Poetry)**

**Full Marks : 65**

*The figures in the margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

### Section – A : Marks 20

### Unit – I

1. (क) महाकाव्यरूपेण रघुवंशम् महाकाव्यस्य मूल्यायनम् **संस्कृतभाषया देवनागरीलिप्या** च विध्रियताम्। 10

*अथवा,*

(ख) (i) ज्ञाने मौनं क्षमा शक्तौ त्यागे श्लाघाविपर्ययः — इत्यस्य चरणस्य सप्रसङ्गं व्याख्या **संस्कृतभाषया देवनागरीलिपिमाश्रित्य** कर्तव्या। 5

(ii) वैवस्वतोमनुर्नाम माननीयो मनीषिनाम्।। — अस्य चरणस्य **देवभाषया देवनागरीलिप्या** च भावसम्प्रसारणं कार्यम्। 5

### Unit – II

2. संक्षेपेण यथामति **पञ्च प्रश्नानाम्** उत्तरं **संस्कृतभाषया देवनागरीलिप्या** च दीयताम्। 2×5

(क) जगतः पितरौ कौस्तः?

(ख) का आसीत् सुदक्षिणा?

(ग) दिलीपः कीदृशः गुणविशिष्टः आसीत्?

(घ) रघुवंशम् कीदृशम् काव्यम्? रघुवंशे कियन्तः सर्गाः सन्ति?

(ङ) कथं कविः कालिदासः उपहासम् आशङ्कते?

(च) दिलीपः कथमात्मानं रक्षितवान्?

(छ) 'सेना' शब्देन किं बोध्यते?

## Section – B : Marks 20

### Unit – I

3. (क) शिशुपालवधस्य महाकाव्यस्य देवर्षेः नारदस्य अलौकिकम् अवतरणदृश्यं निर्वर्ण्य तं प्रति श्रीकृष्णस्य अभ्यर्थना लिख्यताम्। 10

*अथवा,*

(ख) माघकवेः रचनाशैलीं सोदाहरणमालोच्यताम्। 10

### Unit - II

4. अधोलिखितेषु यथामति **पञ्च प्रश्नानाम्** उत्तरं **संस्कृतभाषया देवनागर्या लिप्या** च प्रदेयम्। 2×5

(क) नारददर्शनस्य फलं किमस्ति?

(ख) श्रीकृष्णस्य 'पुण्डरीकाक्षः' इति नाम कथं सार्थकं अभवत्?

(ग) शिशुपालवधकाव्यस्य नायकप्रतिनायकयोः नामोल्लेखं कुरु।

(घ) 'वाडवजातवेदा' शब्दस्य कोऽर्थः?

(ङ) 'रथाङ्गपाणिः' शब्देन कः बोध्यते? 'तापिञ्छ' शब्दस्य कोऽर्थः?

(च) श्रीकृष्णनारदयोः सम्मिलिता देहशोभा कीदृशी आसीत्?

## Section – C : Marks 10

### Unit – II

5. (क) निम्नप्रदत्तयोः कस्यापि **एकस्य** श्लोकस्य सप्रसङ्गं व्याख्या कार्या (**संस्कृतभाषया देवनागरीलिप्या** च)। 5

(i) अम्भोजिनीवननिवासविलासमेव हंसस्य हन्ति नितरां कुपितो विधाता।
न त्वस्य दुग्धजलभेदविधौ प्रसिद्धां वैदग्ध्यकीर्तिपहर्तुमसौ समर्थः॥

(ii) साहित्यसङ्गीतकलाविहीनः साक्षात् पशुः पुच्छविषाणहीनः।
तृणं न खादन्नपि जीवमानस्तद्भागधेयं परमं पशूनाम्॥

(ख) निम्नलिखितयोः यथेच्छं कस्यापि **एकस्य** भावसम्प्रसारणं कर्तव्यं **सुरभाषया देवनागरीमाश्रित्य**। 5

(i) सर्वस्यौषधमस्ति शास्त्रविहितं मूर्खस्य नास्त्यौषधम्।

(ii) कुत्स्याः स्युः कुपरीक्षका न मणयो यैरर्घतः पातिताः॥

**Section – D : Marks 15**

**Unit – II**

**6.** अधोलिखितेषु किमपि विषयत्रयमवलम्ब्य संक्षिप्ता टीका कार्या। 5×3

(क) ऋतुसंहारः।

(ख) जयदेवस्य गीतगोविन्दम्।

(ग) कुमारसम्भवम्।

(घ) माघकवेः कविकृतिः।

(ङ) सौन्दरनन्दः।